CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नामानीमानि यो मर्त्यश्चतुःषष्ठ्या दिने दिने । जपेत् त्रिसन्ध्यं तस्येह दुष्टबाधा प्रशाम्यति ॥

उपरोक्त चतुःषष्टि देवियों के नाम को जो मनुष्य चौंसठ दिन तक क्रमशः एक-एक नाम का तीनों काल में (प्रातः मध्याह्न सन्ध्या समय) जप करे तो उसकी सब (विघ्न-बाधा) आदि व्याधि शीघ्र ही दूर हो जावे । (यज्ञ में तो विशेष करके इनका स्थापन पूजन करना चाहिये ।)

अथ प्रधानदेवतानां आवाहनं स्थापनं च । पाद्यादिभिः सम्पूज्य प्रतिमाया अग्न्युत्तारणं कृत्वा पंचगव्येन शुद्धिः कार्या । ततः पञ्चामृतैः स्नापयित्वा आवाहनप्राणप्रतिष्ठे कार्ये । गन्धाक्षतपुष्पधूप-दीपनैवेद्याचमनीयताम्बूलदक्षिणाभिः पूजयेत् ।

इसके बाद प्रधान देवता (जिस यज्ञ में जिस देवता की प्रधानता हो) का आवाहन, स्थापन तथा पाद्यादिकों (षोडशोपचार) से पूजन करे । प्रधान देवता की प्रतिमा को पहिले अग्नि में थोड़ा गर्म करके पञ्चगव्य से शुद्ध करे । फिर पंचामृत से स्नान कराके उसका आवाहन एवं प्राण प्रतिष्ठा करके गंध, अक्षत, पुष्प, धूप, दीप, नैवेद्य, आचमनीय ताम्बूल और दक्षिणा आदिकों से पूजन करे ।

यद्यदर्पितं तेन कर्माङ्गदेवताः प्रीयन्तां न मम ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ कुशकण्डिकाकरणम् ।

इस मन्त्र से पुष्पांजलि समर्पण करके प्रणाम करे और कहे कि, हे कर्माङ्ग देवताओं ! मैंने जो आपकी सेवा की है, उससे आप सन्तुष्ट होवें; यह मेरे लिये न हो ।

शुद्धायां भूमौ दर्भैः परिसमूहनं हस्तमात्रपरिमितां चतुरस्रां भूमिं कुशैः परिसमूह्य तानैशान्यां परित्यज्य गोमयेनोपलिप्य स्रुवमूलेन प्राङ्मुखं प्रादेशमात्रमुत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणाऽनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य ऐशान्यां दिशिस्थापयेत् । तत उदकेनाभ्युक्षणम् । एते पञ्च भूसंस्काराः यत्र यत्राग्निस्थापनं तत्र तत्र क्रियन्ते ॥

एक हाथ लम्बी और एक हाथ चौड़ी (वर्गाकार) पवित्र भूमि पर सुन्दर वेदी बनाकर, उस पर कुशाओं को बिछावे और पुनः उन्हीं कुशाओं से वेदी को झाड़ कर बिछाये हुये कुशाओं को ईशानकोण में फेंक देवे । अब वेदी को गोबर से लीपकर स्रुवा के मूल से पूर्वकी ओर उत्तरोत्तर क्रम से तीन रेखा खींचे । तीनों रेखाओं की उभड़ी हुई मिट्टी को अनामिका अंगुष्ठ से उठा कर ईशान कोण में रख देवे । इसके बाद वेदी को जल से सींचे । ये पाँचो भू-संस्कार (वेदी रचना, कुशाच्छादन, गोबर से लीपना, रेखा करना और जल से वेदी को सींचना) जहाँ २ अग्निस्थापन करना हो, वहाँ २ सर्व प्रथम करना चाहिये ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथाग्निस्थापनम् ।

तत्र वामहस्तानामिकया भूमिं स्पृशन् ताम्रादिपात्रेणाहृतमग्निमानीयात्माभिमुखं निदध्यात् । तद्रक्षार्थं कञ्चिन्नियुज्य आनीताग्निपात्रे अक्षतादिप्रक्षेपः । ततोग्निं प्रदक्षिणीकृत्य पुष्पचन्दनताम्बूल-पूगीफलद्रव्यवस्त्राण्यादाय अग्नेर्दक्षिणतो वस्त्रास्तरणं कल्पयित्वा ब्राह्मणं पादप्रक्षालनगन्धमाल्यादिभि-रभिपूज्य हस्ते धौतवस्त्रोत्तरीयकमण्डलुभूषणादिकं गृहीत्वा ॐ अद्य कर्त्तव्यामुकहवनकर्मणि कृता-कृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्द्रव्याक्षतपूगीफलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात् ।

वहाँ पर बायें हाथ की अनामिका अंगुली से पृथ्वी को स्पर्श करता हुआ । ताम्र अथवा कांस्य के पात्र में अग्नी मँगा कर अपने सामने रक्खे । उसके रक्षार्थ (जिससे अग्नि बुझ न जाय) कुछ रखकर, आये हुए अग्निपात्र में अक्षतादि छोड़े । इसके बाद यजमान अग्नि की प्रदक्षिणा करके अग्निसे दक्षिण, ब्रह्माके लिये आसन देवे और ब्रह्माका पैर धोकर गंध–पुष्प माला

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदि से उनकी पूजा करके पुष्पाक्षत ताम्बूल, पूंगीफल सहित धोती, दुपट्टा, कमण्डलु, [जलपात्र] और भूषणादि हाथ में लेकर "ओमद्य" से "त्वामहं वृणे" तक पढ़कर ब्रह्माका वरण करे।

ततो वृतोस्मि । व्रतेन दीक्षामाप्नोति दीक्षयामाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ इति प्रतिवचनमुक्त्वाऽग्नेर्दक्षिणतः कल्पितासनोपरि उपविशेत् ।

तत्पश्चात् ब्रह्मा "वृतोऽस्मी" ऐसा कहकह "व्रतेन"–इत्यादि मंत्र से यजमान का मार्जन करे और पहिले से रखे हुए आसन पर बैठे।

ततः प्रणीतापात्रं दारुकाष्ठमयं द्वादशाङ्गुलोच्चं चतुरङ्गुलमध्यखातं पद्माकृतिं पुरतो निधाय जलेना-पूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् ॥

इसके बाद यजमान उस प्रणीतापात्र को–जो १२ अँगुल ऊँचा और ४ अँगुल गहिरा यज्ञकाष्ट (पलाश आम्रादि) का बना हुआ पद्मके आकार का होता है। उसे जलसे भरकर कुशासे आच्छादित करे और ब्रह्मा का मुख देखकर अग्नि से उत्तर की ओर कुशा के ऊपर रख देवे।

ततो बर्हिषा परिस्तरणम् ॥ बर्हिर्नाम्नामेकाशीतिदर्भदलानां चतुर्द्धा भागं कृत्वा यथा एकेन दर्भेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शून्यहस्तो न भवति तथा प्रथमभागमादाय आग्नेयादीशानान्तम् १ द्वितीयभागमादाय ब्रह्मणोऽग्निपर्यन्तम् २ तृतीयभागमादाय नैर्ऋत्याद्वायव्यान्तम् ३ चतुर्थभागमादाय अग्नितः प्रणीतापर्यन्तम् ४ परिस्तरणं कुर्यात् ।

इसके बाद कुशाच्छादन की विधि लिखते हैं । पहिले एकाशी कुशाको लेकर उसका चार भाग करे, परन्तु यह ध्यान रहे कि हाथ कभी कुशा से खाली न रहने पावे । (इसीलिये ४ से भाग देने पर भी १ शेष रहने के लिये ८१ कुशा का विधान है ।) पूर्वोक्त कुशा के प्रथम भाग (२०) को लेकर अग्निकोण से ईशान तक दूसरे भाग को लेकर ब्रह्मा से अग्नि पर्य्यन्त, तीसरे भाग को लेकर नैर्ऋत्यकोण से वायव्य कोणतक और चौथे भाग को लेकर अग्नि से प्रणीता पर्यन्त क्रमसे कुशा बिछावें ।

ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रम् आज्यस्थाली चरुस्थाली सम्मार्जनकुशाः पञ्च, उपयमनकुशाः सप्त, समिधास्तिस्रः प्रादेशमात्राः स्रुवः खादिरः, आज्यं पट्, पञ्चाशदुत्तरशतद्वयमुष्टयवच्छिन्नं तण्डुलपूर्णपात्रं दक्षिणावरो वा पवित्रच्छेदन-कुशानां पूर्वपूर्वक्रमेणैतान्यासादनीयानि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

इसके बाद अग्निसे उत्तर व पश्चिम दिशा में पवित्रछेदन के लिये तीन कुशा, पवित्र करने के लिये कुश के बीचका दो पत्र, ५०
३० प्रोक्षणीपात्र, आज्यस्थाली (घृतपात्र) खीरपात्र, पाँच सम्मार्जन कुशा, सात उपयमन कुशा, प्रादेशमात्र (अंगुष्ट और तर्जनी के विस्तार को प्रादेश कहते हैं) तीन समिधा, स्रुवा और ब्रह्मा के लिये २५६ मुट्ठी (अढ़ाई पसेरी) चावल से भरा हुआ पूर्णपात्र तथा कुछ फल–आदि सामग्रियोंको क्रमशः पूर्व दिशा में रखना चाहिये ।

अत्र त्रिभिः पवित्रे छित्वा सपवित्रकरणे प्रणीतोदकं त्रिःप्रोक्षणीपात्रे निधाय प्रोक्षणीपात्रं वामहस्ते धृत्वा दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां पवित्रं गृहीत्वा त्रिरुत्पवनम् ॥ ततः प्रोक्षणीपात्रं आकाशस्थप्रणीतोदकेनापूरयेत् । भूमौ पतति चेत्तदा प्रायश्चित्तं गोदानम् । ततः प्रोक्षणीजलेन यथासादितवस्त्वनुरूपं सेचनम् ।

अब दोनों पवित्र कुशाओं को तीन २ खण्ड करके अनामिका में पवित्री पहिनकर प्रणीता के जलको प्रोक्षणीपात्र में तीन बार छोड़े। फिर प्रोक्षणीपात्र को बायें हाथ में रखकर दहिने हाथ की अनामिका–अंगुष्ठ से पवित्र को लेकर तीन बार, जल ऊपर
उछाले । इसके बाद प्रणीता के जलसे प्रोक्षणीपात्रको भर देवे ! यदि भरते समय जल भूमि पर गिरे तो प्रायश्चित होता है । २०
उसके लिये गोदान करना पड़ेगा । इसके बाद प्रोक्षणी जल से रखी हुई सामग्रियों को पूर्ववत् सींचे ।

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात्। आज्यस्थाल्यामाज्यनिर्वापः। चरुपात्रे चरुप्रक्षेपः। आज्याऽधिश्रयणम्। ततो ज्वलत्तृणमादाय आज्यस्योपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तत्प्रक्षेपः। ततः स्रुवप्रतपनं कृत्वा सम्मार्जनकुशैः स्रुवसम्मार्जनं मूलेन मूलं मध्येन मध्यम् अग्रेणाग्रम् पुनः प्रताप्य स्रुवं दक्षिणतो निदध्यात्।

इसके बाद अग्नि और प्रणीता के बीच में प्रोक्षणीपात्र को रक्खे। घृतपात्रमें घृत और खीरपात्रमें खीर छोड़े घृत को अग्नि पर गर्म करके एक जलता हुआ तृण ले, उसपर प्रदक्षिणा की भाँति घुमाकर उसे अग्निमें छोड़ देवे। तत्पश्चात् स्रुवा को अग्निमें तपाकर सम्मार्जन कुशाओं के मूल से मूल मध्य से मध्य और अग्रभाग से स्रुवा के अग्रभाग का मार्जन करके उसे फिर अग्नि में तपाकर दक्षिण दिशा में रख देवे।

ततः आज्योत्तारणं अवेक्षणम् अपद्रव्यनिरसनं च। तत उपयमनकुशानादाय बामहस्ते धृत्वा अग्निपर्युक्षणं कृत्वा उत्तिष्ठन्मनसा प्रजापतिं ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः क्षिपेत्। उपविश्य सपवित्रप्रोक्षण्युदकेनाग्निं पर्युक्ष्य पवित्रे प्रणीतापात्रं निधाय पातित-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतिं जुहोति ।

इसके बाद घृतका निरीक्षण करके उसको साफ कर लेना चाहिये। उपयमन कुशाको बायें हाथ में लेकर अग्निका सिंचन करके खड़े होकर मनसे ब्रह्माका ध्यान करके मौनभाव से घृतमें बोरी हुई तीन समिधाओंको अग्नि में छोड़े। फिर बैठकर प्रोक्षणी के जल से अग्निका मार्जन करके मौनभाव से घृतमें बोरी हुई तीन समिधाओंको अग्नि में छोड़े। फिर बैठकर प्रोक्षणी के जल से अग्निका मार्जन करके पवित्र को प्रणीता पात्रपर रखकर, अपनी दक्षिण जानु पृथ्वी पर रखता हुआ यजमान होता (हवन करने वाले ब्राह्मणों का वरण करके प्रज्वलित अग्नि में स्रुवा से ही घृताहुति देवे।

तत्राघारादारभ्य द्वादशाहुतिषु प्रत्याहुत्यनन्तरं स्रुवस्थितशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

यहाँ पर आघार से लेकर द्वादशाहुति के बाद स्रुवा में बचे हुये घृतको प्रक्षणीपात्र में छोड़ देवे।

॥ अथ समिद्विधिः ॥

समिदर्कमयी भानोः पालाशी शशिनस्तथा। खादिरी भूमिपुत्रस्य त्वपामार्गी बुधस्य च ॥ गुरोरश्वत्थजा प्रोक्ता शुक्रस्यौदुम्बरी मता। शमीनां तु शनेः प्रोक्ता राहोर्दूर्वामयी तथा ॥ केतोर्दर्भमयी प्रोक्ताऽन्येषां पालाशवृक्षजा ॥ ३१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्यका मदार, चन्द्रमाका पलाश, मंगलका खैर, बुधका चिचिढ़ी, वृहस्पतिका पीपल, शुक्रका गूलर, शनिका शमी, राहुका दूर्वा और केतु का कुशा ही समिधि–काष्ठ कहा गया है। इनके अतिरिक्त देवताओं के हवन में पलाश, आम अथवा कुशा (देश–भेद से) ही समिधा जाननी चाहिये ॥ १ ॥

आर्की नाशयते व्याधिं पालाशी सर्वकामदा। खादिरी त्वर्थलाभायापामार्गी चेष्टदर्शिनी। प्रजालाभाय चाश्वत्थी स्वर्गायोदुम्बरी भवेत्। शमी शमयते पापं दूर्वा दीर्घायुरेव च। कुशाः सर्वार्थकामानां परमं रक्षणं विदुः ॥ २ ॥

मन्दार रोगको नाश करता है, पालाश सब कार्यको सिद्ध करनेवाला है, खैर धन देने वाला है, चिचिढ़ी से इष्टलाभ, पीपलसे प्रजालोभ, गूलरसे स्वर्गप्राप्ति, शमीसे पापनाश, दूर्वा से दीर्घायु और कुशा से सम्पूर्ण मनोरथों की पूर्ति होती है। ये क्रमसे नवग्रह के हवन काष्ठ के फल हैं ॥ २ ॥

यथा बाणप्रहाराणां कवचं वारकं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवति वारिका ॥ यथा समुत्थितं यन्त्रं यन्त्रेण प्रतिहन्यते। तथा समुत्थितं घोरं शीघ्रं शान्त्या प्रशाम्यति ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इस मंत्र को पढ़ कुशा से जल लेकर यजमान का मार्जन करे (इसका अर्थ स्पष्ट है)।

अथाग्न्यावाहनम् ॥ ततः कुण्डमध्ये 'ॐ रं' इति वह्निबीजं लिखेत् । उत्पत्तिमुद्रां कृत्वा चाऽऽवाहयेदग्निपूरुषम् । रुद्रतेजस्समुद्भूतं द्विमूर्धानं द्विनासिकम् ॥ स्रुवं स्रुवं च शक्तिं चाप्यक्षमालां च दक्षिणैः । तोमरं व्यंजनं चैव घृतपात्रं तु वामकैः ॥ बिभ्रन्तं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम् । दक्षिणं च चतुर्जिह्वं त्रिजिह्वं चोत्तरं मुखम् । कोटिद्वादशमूर्त्याख्यं द्विपञ्चाशत्कलायुतम् । स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम् ॥ रक्तमाल्याम्बरं रक्तं रक्तपद्मासनास्थितम् । रौद्रं वागीश्वरीरूपं वह्निमावाहयाम्यहम् ॥ इति ध्यात्वा ॥ त्वं मुखं सर्वदेवानां सप्तार्चिरमिद्युते ॥ आगच्छ भगवन्नग्ने यज्ञेस्मिन्सन्निधो भव ॥ अग्ने वैश्वानर ! इहागच्छ इह तिष्ठ इत्यावाह्य पञ्चोपचारैः पूजयेत् ।

अग्निकुण्ड अथवा वेदी के मध्यमें "ॐ रं" इस वह्निबीज को लिखे । फिर "रुद्रतेज" से "वह्निमावाहयाम्यहम्" तक पढ़ कर अग्निदेवका ध्यान करे और "त्वं मुखं" आदि पढ़कर अग्निका आवाहन तथा पंचोपचार से उनका पूजन करे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततोऽग्नेः सप्तजिह्वानां पूजा। कनकायै नमः। रक्तायै नमः। कृष्णायै नमः। उद्गारिण्यै नमः। उत्तरमुखे सुप्रभायै नमः। बहुरूपायै नमः। अतिरिक्तायै नमः। तदनन्तरं सर्वसमिद्वनस्पतीनां पूजनञ्चेति ॥

ऊपर लिखे हुये जो अग्नि के सात नाम हैं, उन्हीं नामों से इनका आवाहन करे। ये ही अग्निदेव की सात जीभें हैं। इसी लिये अग्नि का नाम "सप्तजिह्व" भी पड़ा। इसके बाद समित्काष्ठों और वनस्पतियों का पूजन करे।

ॐ अद्येत्यादि अमुकगोत्रोऽमुकनामाहं सकुटुम्बस्य सपरिवारस्यात्मनः सर्वाभीष्टफलप्राप्त्यर्थममुकयज्ञ-कर्मणा श्रीसूर्य्यादिनवग्रहादीनां साधिदेवताप्रत्यधिदेवतानां दशदिक्पालानाममुकप्रधान देवतासहितानां च प्रीतये ब्राह्मणद्वारा यवतिलधान्याज्यशर्करादिद्रव्यैस्तत्तद्देवतामन्त्रैर्यक्ष्ये ॥

यजमान हाथ में जल, अक्षत, पुष्प और दक्षिणा लेकर "ओमद्य" से " यक्ष्यै " तक पढ़ कर संकल्प करे।

अथ होमः ॥ तत्रादौ मनसा व्याहृतिभिराहुतीर्दद्यात् ॥ ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम। ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम। ॐ अग्नये स्वाहा, इदमग्नये न मम। ॐ सोमाय स्वाहा, इदं सोमाय न मम। ॐ भूः स्वाहा, इदमग्नये न मम। ॐ भुवः स्वाहा इदं वायवे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न मम । ॐ स्वः स्वाहा, इदं सूर्य्याय न मम । एता महाव्याहृतयः ।

इसके वाद मनही मन उपरोक्त (सप्तव्याहृति) मन्त्र से आहुति देवे येही सप्तव्याहृतियों के नाम हैं ।

यथा वाणप्रहाराणां कवचं वारकं भवेत् । तद्वद्दैवोपघातानां शान्तिर्भवति वारिका ॥ शान्तिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु यत्पापं तत्प्रतिहतमस्तु । द्विपदे चतुष्पदे सुशान्तिर्भवतु ॥ इति प्रायश्चित्तहोमः ॥

अव प्रायश्चित्त होम कहते हैं । जैसे वाण के प्रहार को रोकनेवाला कवच होता है, वैसेही दैवघात को रोकने वाली शान्ति हुआ करती है । इस मन्त्र से यजमान के ऊपर जल छिड़क कर मार्जन करे ।

अथ पञ्चवारुणीहोमः ॥ ॐ त्वन्नोऽअग्ने व्वरुणस्यव्विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठोव्वह्नितमः शोशुचानो व्विश्वाद्वेषा ꣳ सि प्रमुमुग्ध्यस्मत्स्वाहा, इदमग्नीवरुणाभ्यां न मम । ॐ सत्वन्नोऽग्ने वमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ अवयद्ववनो व्वरुणꣳ र राणो-व्वीहिमृडीकꣳ सुहवोनऽएधि स्वाहा, इदमग्नीवरुणाभ्यां न मम । ॐ अयाश्चाग्नेऽस्यनभिशस्ति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाश्च सत्वमित्वमयाऽसि । अयानो यज्ञं वहास्य यानो धेहि भेषज ॐ स्वाहा, इदमग्नये न मम ॐ येते शतं वरुण ये सहस्रंयज्ञियाः पाशाव्वितता महान्तः । तेभिर्नोऽद्य सवितोत विष्णुर्व्विश्वे मुंचन्तु मरुतः स्वर्काः स्वाहा, इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम । ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमांव्विमध्यम ॐ श्रथाय । अथा-व्वयमादित्यव्व्रते तवानागसोऽअदितयेस्याम स्वाहा, इदं वरुणायादित्यायादितये न मम । अत्रोदकस्पर्शः । इति पंचवारुणीहोमः ॥

ऊपर लिखे मन्त्रों से पंचवारुणी होम करे । इसके बाद जलस्पर्श करे ।

अथ नवग्रहाणां होमः ॥ तत्रादौ नवग्रहाणां समिधः । अर्कः पलाशो खदिरो ह्यपामार्गोऽथपिप्पलः । उदुम्बरः शमी दूर्वाः कुशाश्च समिधःक्रमात् ॥ ततो घृताक्ताः समिधो जुहुयात् ।

इन नवों समिधाओं को घी में डुबो २ कर, नीचे लिखे मन्त्रों से नवग्रह का हवन क्रमशः करे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा. ओ३म् आकृष्णेन रजसाऽवर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेन देवोयाति भुवनानि
३४ पश्यन् स्वाहा, इदं सूर्याय न मम ।

इस मन्त्र से मन्दार काष्ठ को घी में डुबोकर सूर्य के लिये हवन करे ।

ओ३म् इमं देवाऽअसपत्न ᳪ सुवध्वंमहते क्षत्राय महते ज्यैष्ठयाय महते जानराज्यायेन्द्रस्येन्द्रियाय इमममुष्य पुत्रमस्यै ऽविश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाᳪराजा स्वाहा, इदं चन्द्राय न मम ।

इस मन्त्र से चन्द्रमा के लिये पलास से हवन करे ।

ओ३म् अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपाᳪरेताᳪसि जिन्वति स्वाहा, इदं मङ्गलाय न मम । ३४

इस मन्त्र से मङ्गल के लिये खैर से हवन करे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहीत्वमिष्टापूर्ते स ꣳ सृजेथामयञ्च । अस्मिन्त्सधस्थऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत स्वाहा, इदं बुधाय न मम ॥

इस मन्त्र से बुध के लिये चिचिढ़ी से हवन करे ।

ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रꣳस्वाहा, इदं बृहस्पतये न मम ।

इस मन्त्र से बृहस्पति के लिये पीपल से हवन करे ।

ॐ अन्नात्परिस्रुतो रसम्ब्रह्मणाव्यपिवत्क्षत्रम्पयः सोमम्प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपान ꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु स्वाहा, इदं शुक्राय न मम ।

इस मन्त्र से शुक्र के लिये गूलर से हवन करे ।

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः स्वाहा, इदं शनैश्चराय० ।

इस मन्त्र से शनैश्चर के लिये शमी से हवन करे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ कयानश्चित्रऽआभुवदूती सदावृधः सखा। कयाशचिष्ठयावृता स्वाहा, इदं राहवे०।

इस मन्त्र से राहु के लिये दूर्वा से हवन करे।

ॐ केतुं कृण्वन्नकेतवे पेशो मर्याऽअपेशसे। समुषद्भिरजायथाः स्वाहा, इदं केतवे न मम। इति नवग्रहाणां होमः॥

इस मन्त्र से केतु के लिये कुशा से हवन करे।

अथ नवग्रहाऽधिदेवतानां होमः॥ ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्स्वाहा, इदं त्र्यम्बकाय न मम।

इस मन्त्र से त्र्यम्बक (महादेव) के लिये हवन करे।

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण स्वाहा, इदमुमायै न मम।

इस मन्त्र से उमादेवी (पार्वती) के लिये हवन करे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ यदक्रन्दः प्रथमं जायमान ऽउद्यन्त्समुद्रादुतवा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहूउपस्तुत्यं महिजातं ते अर्वन् स्वाहा, इदं स्कन्दाय न मम ।

इस मन्त्र से स्कन्द (षडानन) के लिये हवन करे ।

ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि व्विष्णोर्ध्रुवोऽसिवैष्णवमसि विष्णवे त्वा स्वाहा, इदं विष्णवे न मम ।

इस मन्त्र से विष्णुभगवान् के लिये हवन करे ।

ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः स बुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः स्वाहा, इदं ब्रह्मणे न मम ।

इस मन्त्र से ब्रह्मा के लिये हवन करे ।

ॐ त्रातारमिन्द्रमवितारमिन्द्र ꣳ हवे हवेसुहवे ꣳ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ꣳ स्वस्तिनो मघवा धात्विन्द्रः स्वाहा । इदमिन्द्राय न मम ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इस मन्त्र से इन्द्र के लिये हवन करे।

३६ ओ३म् असि यमो ऽअस्यादित्यो ऽअर्वन्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि स्वाहा, इदं यमाय न मम। अत्रोदकस्पर्शः।

इस मन्त्र से यम के लिये हवन करे। यहाँ पर जल का स्पर्श कर लेना चाहिये।

ओ३म् कार्षिरसि समुद्रस्य त्वाक्षित्या ऽउन्नयामि। समापो ऽअद्भिरग्मत समोषधीभिरोषधीः स्वाहा, इदं कालाय न मम। अत्राप्युदकस्पर्शः।

इस मन्त्र से काल के लिये हवन देवे। यहाँ भी जल का स्पर्श करे।

ओ३म् इन्धानास्त्वा शत ꣳ हिमा द्युमन्त ꣳ समिधीमहि। वयस्वन्तो वयस्कृत ꣳ सहस्वन्तः सहस्कृतम्। अग्ने सपत्नदम्भव नमदब्धासोऽअदाभ्यम्। चित्रावसो स्वस्ति ते पारमशीय स्वाहा, इदं चित्रगुप्ताय न मम। ३६

इस मन्त्र से चित्रगुप्त के लिये हवन करे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति नवग्रहाधिदेवानां होमः ॥ अथ नवग्रहप्रत्यधिदेवतानां होमः ।
अब नवग्रहों के प्रत्यधि देवताओं के लिये निम्नलिखित मंत्रों से हवन करे ।

ॐ अग्निदूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँऽऽआसादयादिह स्वाहा, इदमग्नये० ।
इस मंत्र से अग्नि के लिये हवन देवे ।

ॐ अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवत व्याजिनः । देवीरापो यो वँ ऊर्म्मिः प्रमूर्ति ककुद्मान्वाजसास्तेनायं वाज ँ सेत् स्वाहा, इदमद्भ्यः ० ।
इस मंत्र से जल के लिये हवन देवे ।

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशिनी । यच्छानःशर्म सप्रथाः स्वाहा, इदं पृथिव्यै० ।
इस मंत्र से पृथिवी के लिये हवन देवे ।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ँ सुरे स्वाहा, इदं विष्णवे० ।
इस मंत्र से विष्णु भगवान के लिये हवन देवे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा. ॐ सजोषाऽइन्द्र सगणो मरुद्भिः सोमम्पिब वृत्रहा शूर विद्वान् । जहि शत्रूꣳ रपमृधो नुदस्वाथाभयं प०
३७ कृणुहि व्विश्वतो नः स्वाहा, इदमिन्द्राय० ।

इस मंत्र से इन्द्र के लिये हवन देवे ।

ॐ आदित्यै रास्नासीन्द्राण्या उष्णीवः पूषासि धर्मायदीष्व स्वाहा, इदमिन्द्राण्यै० ।

इस मंत्र से इन्द्राणी देवी के लिये आहुति देवे ।

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तु
व्वयꣳ स्याम पतयो रयीणाꣳ स्वाहा, इदं प्रजापतये० ।

इस मंत्र से प्रजापति के लिये हवन देवे ।

ॐ नमोऽस्तु सर्प्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे दिवितेभ्यः सर्प्पेभ्यो नमः स्वाहा २७
इदं सर्प्पेभ्यः ।

इस मंत्र से सर्प (नाग) के लिये आहुतिदान करे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ब्रह्म जज्ञानं प्रथमम्पुरस्ताद्विसीमतः सुरुचो व्वेन आवः । स बुध्न्या उपमाऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः स्वाहा, इदं ब्रह्मणे० । इति नवग्रहप्रत्यधिदेवतानां होमः ॥

इस मंत्र से ब्रह्मा के लिये आहुति देवे ।

अथ पञ्चलोकपालानां होमः ॥ ॐ गणानान्त्वा गणपति ँ हवामहे प्रियाणांत्वा प्रियपति ँ हवामहे । निधीनांत्वा निधिपति ँ हवामहे व्वसो मम । आहमजानि गर्भधमात्वमजासि गर्भधम् स्वाहा, इदं गणपतये० ।

ऊपर लिखे मंत्र से गणपति के लिये आहुति प्रदान करे ।

ॐ अम्बेऽअम्बिकेऽअम्बालिके न मानयति कश्चन । स सत्यश्वकः सुभद्रिकां काम्पीलवासिनीं स्वाहा, इदं दुर्गायै० ।

इस मंत्र द्वारा श्रीदुर्गा देवी के लिये हवन प्रदान करे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा. ओ३म् वातोवामनो वा गन्धर्वाः सप्तवि ᳪं शतिः । तेऽअग्रेऽश्वमयुञ्जंस्ते ऽअस्मिञ्जवमादधुः प०
३८ स्वाहा, इदं वायवे० ।

इस मंत्र से वायु देवता के लिये हवन देवे ।

ओ३म् उदु्र्ध्वाऽअस्य समिधो भवन्त्यूदु्र्ध्वा शुक्रा शोची ᳪं ष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः स्वाहा, इदमाकाशाय० ।

इस मंत्र से आकाशतत्त्व को आहुति देवे ।

ओ३म् अश्विनो भैषज्येन ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि स्वाहा, इदमश्विभ्यां० ॥

इस मंत्र से अश्विनीकुमार के लिये हवन देवे ।

अथ दशदिक्पालानां होमः ॥ ओ३म् त्रातारमिन्द्रमवितारमिन्द्र ᳪं हवे हवे सुहवशूरमिन्द्रम् । ३८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ह्वयामि शक्रम्पुरुहूतमिन्द्र ँ स्वस्ति नो मघवा धात्विन्द्रः स्वाहा, इदमिन्द्राय० ।

इस मंत्र से इन्द्र देवता को आहुति देवे ।

ॐ अग्निदूतं पुरो दधे हव्यवाहमुपब्रुवे । देवांऽऽआसादयादिह स्वाहा, इदमग्नये० ।

इस मंत्र से अग्नि देवता के लिये हवन प्रदान करे ।

ॐ असि यमो ऽअस्यादित्या ऽअर्वन्नसि त्रितो गुह्येन व्रतेन । असि सोमेन समया विपृक्त ऽआहुस्ते त्रीणि दिवि बन्धनानि स्वाहा, इदं यमाय० ।

इस मंत्र से यम देवता को आहुति प्रदान करे ।

ॐ एष ते निर्ऋते भागस्ते जुषस्व स्वाहा, अग्निनेत्रेभ्यो देवेभ्यः पुरः सद्भ्यः स्वाहा, यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहा, विश्वेदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा, मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरासद्भ्यः स्वाहा, सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दिवः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वन्तस्तेभ्यः स्वाहा, इदं निर्ऋतये० ।

इन ऊपर लिखे हुए मंत्रों को पढ़कर निर्ऋति देवता को आहुति देवे ।

ॐ इमम्मे व्वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके स्वाहा, इदं वरुणाय० ।

इस मंत्र से वरुण देवता के लिये हवन प्रदान करे ।

ॐ वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः स्वाहा, इदं वायवे० ।

इस मंत्र से वायु देवता के लिये हवन करे ।

ॐ कुविदङ्गयवमन्तो यवंचिद्यथादान्त्यनुपूर्व वियूय । इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति स्वाहा, इदं कुबेराय० ॥

इस मंत्र से कुबेर देवता के लिये आहुति प्रदान करे ।

ॐ ईशा वास्यमिद ँ सर्वं यत्किंच जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनं स्वाहा, इदमीशानाय० । अत्रोदकस्पर्शः ॥ ३९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इस मंत्र को पढ़कर ईशान देवता के लिये आहुति देवे और जल स्पर्श करे।

ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोऽवेन आवः सबुध्न्या ऽउपमा ऽअस्य विष्ठाः सतश्च योनिमसतश्च व्विवः स्वाहा, इदं ब्रह्मणे० ।

इस मंत्र से ब्रह्मा के लिये आहुति प्रदान करे।

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा, इदमनन्ताय० । इति दशदिक्पालानां होमः ॥

इस मंत्र से अनन्त वासुकी (सर्प) के लिये आहुति प्रदान करे।

अथ प्रधानदेवस्य होमः ॥ ॐ नमो भगवते वासुदेवाय स्वाहा । शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम् । विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥ लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम् । वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ १ ॥

इस मंत्र से अथवा द्वादशाक्षर मंत्र से भगवान् वासुदेव को आहुति देवे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ नमः शिवायस्वाहा । ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम् । रत्ना कल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्त प्रसन्नम् ॥ पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम् । विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ २ ॥

इस मंत्र से अथवा पंचाक्षर–मंत्र से शिव भगवान् के लिये आहुति देवे ।

ॐ नमो दुर्गायै । तत्र दुर्गोत्सवे-जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते ॥ ३ ॥

इस मंत्र से भगवती दुर्गा देवी को आहुति देवे ।

अमुकप्रधानदेवतायै स्वाहा । अथानन्तरं व्याहृतिहोमः ॥ ओं भूः स्वाहा, इदमग्नये० । ओं भुवः स्वाहा, इदं वायवे० । ओं स्वः स्वाहा इदं सूर्याय० । इति व्याहृतिहोमः ॥

यहाँ पर जो प्रधान देवता हों, उसको उसी के नाम से अथवा मंत्र से आहुति प्रदान करना चाहिये । इसके बाद उपरोक्त तीनों व्याहृति देवताओं को देखकर, मण्डलस्थ देवताओं को नीचे के मंत्रों से आहुति देवे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ सर्वतोभद्रमण्डलदेवतानां होमः ॥

ॐ गणपतये स्वाहा ८ दुर्गायै स्वा० ब्रह्मणे० सोमाय० ईशानाय० इन्द्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० ध्रुवाय० अध्वराय० सोमाय० अद्भ्य० अनिलाय० नलाय० प्रत्यूषाय० प्रभासाय० अस्राय० एकपदे० अहिर्बुध्न्याय० विद्यपाचाय० रैवताय० रवताय० रहाय० बहुरूपाय० त्र्यम्बकाय० सुरेश्वराय० सवित्रे० जयन्ताय० पिनाकिने० रुद्राय० धात्रे० मित्राय० यमाय० रुद्राय० वरुणाय० सूर्याय० भगाय० विवस्वते० पूष्णे० सवित्रे० त्वष्ट्रे० विष्णवे० अश्विभ्यां० क्रतवे० दक्षाय० वसवे० सत्याय० कालाय० कामाय० अध्वराय० रोचनाय० पुरूरवसे० आर्द्रवाय० सोमपाय० अग्निष्वात्ताय० वर्हिषदे० सुकालाय० एकशृङ्गाय० शूद्राय० सोमाय० कश्यपाय० अत्रये० भरद्वाजाय० विश्वामित्राय० गौतमाय० जमदग्नये० वसिष्ठाय० अनन्ताय० वासुकाय० शेषाय० तक्षकाय० कर्कोटकाय० पद्माय० महापद्माय० शंखपालाय० कम्बलाय०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिशाचेभ्यः० गुह्यकेभ्यः० सिद्धेभ्यः० भूतेभ्यः० सर्पेभ्यः० विश्वावसवे० गन्धर्वाय० हाहायै० हूहै०
घृताच्यै० मेनकायै० रम्भायै० उर्वश्यै० तिलोत्तमायै० सुकेश्यै मञ्जुघोषायै० रुद्रेभ्यः० स्कन्दाय०
नन्दीश्वराय० शूलाय० महादेवाय० रुद्राय० श्रियै० विष्णवे० मरुद्गणाय० पितृभ्यः० रोगाय०
मृत्यवे० वसुभ्यः० विघ्नराजाय० अद्भ्यः० समीराय० मारुताय० मरुते जगत्प्राणाय० समीरणाय०
मातरिश्वने० मेदिन्यै० गंगायै० सरस्वत्यै० सरय्वै० कौशिक्यै० वेत्रवत्यै० गोदायै० ताप्यै० रेवायै०
पयोदायै० कृष्णायै० भीमरथ्यै० तुङ्गभद्रायै० क्षुद्रनदीभ्यः० लवणसमुद्राय० इक्षुसमुद्राय० सुरासमुद्राय०
सर्पिः समुद्राय० दधिसमुद्राय० क्षीरसमुद्राय० जीवन समुद्राय० आदित्याय० सोमाय० भौमाय० बुधाय०
बृहस्पतये० शुक्राय० शनैश्चराय० राहवे केतवे० ब्राह्मयै० माहेश्वर्यै० कौमार्य्यै० वैष्णव्यै० वाराह्यै०
इन्द्राण्यै० चामुण्डायै० वज्रायै० शक्त्यै० दण्डाय० खड्गाय० पाशाय० अङ्कुशाय० गदायै० त्रिशूलाय०
पद्माय० चक्राय० । श्रीमहाविष्णवे स्वाहा ॥

उपरोक्त नामों को पढ़कर स्वाहान्त शब्द का उच्चारण करते हुए देवताओं को आहुति प्रदान करे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ बलिप्रदानम् ।

तत्रादौ दशदिक्पालादीनां बलिः ॥ तद्यथा पूर्वे इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदपि दधिमाषभक्तबलिं समर्प्पयामि । भो इन्द्र ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ १ ॥

ऊपर लिखे हुए मंत्रों द्वारा पूर्वादि क्रम से-दीप सहित दही और उरद अथवा लोकाचार के अनुसार बलिसामग्री से इन्द्रादि देवताओं के लिये बलि प्रदान करे ।

आग्नेय्याम्—अग्नये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि । भो अग्ने ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुः कर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ २ ॥

इस मंत्र से अग्निकोणमें अग्निदेव के लिये बलि देवे ।

दक्षिणे—यमाय साङ्गाय सपरिवाराय सशक्तिकायं एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भो यम ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ ३ ॥

इस मंत्र से दक्षिण दिशा में यम के लिये बलि देवे ।

नैर्ऋत्यां-निर्ऋतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि । भो निर्ऋते दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ ४ ॥

इस मंत्र से निर्ऋति देवता के लिये हवन करे ।

पश्चिमे-वरुणाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि । भो वरुण ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ ५ ॥

इस मंत्र से पश्चिम दिशा में वरुण के लिये बलि देवे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वायव्यां–वायवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि । भो वायो ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ ६ ॥

इस मंत्र से वायव्य में वायु देवता के लिये वलि देवे।

उत्तरस्यां–कुबेराय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि । भो कुबेर ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुः कर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ ७ ॥

इस मंत्र से उत्तर दिशा में कुबेर के लिये वलि देवे।

ऐशान्याम्–ईशानाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दभिमाषभक्तबलिं समर्प्पयामि । भो ईशान ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुः कर्ता क्षेमकर्ता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा. शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ ८ ॥ प०

४३ इस मंत्र से ईशान कोण में ईशान देवता को बलि प्रदान करे ।

ईशानपूर्वयोर्मध्ये—ब्रह्मणे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि । भो ब्रह्मन् । दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुः कर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ ९ ॥

इस मंत्र से ईशान और पूर्व के मध्य में ब्रह्मा के लिये बलि देवे ।

निर्ऋतिपश्चिमयोर्मध्ये—अनन्ताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि । भो अनन्त । दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुः कर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥ १० ॥ इति दशदिक्पालबलिः ॥ ४३

इस मंत्र से नैर्ऋत्य और पश्चिम दिशा के मध्य में अनंत देवता के लिये बलि प्रदान करे । बलि देते समय सबसे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यह प्रार्थना करता जाय, कि हे अमुक देवता ! आप दिशा की रक्षा करें, बलि का भोजन करें, और मुझ सकुटुम्ब यजमान को आयु क्षेम शान्ति पुष्टि देते हुए वर देने वाले होवें ।

अथ नवग्रहबलिः ॥ ग्रहेभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि । भो ग्रहाः ! दिशो रक्षध्वं बलिं भक्षध्वं अस्य यजमानस्य सकुटुम्बस्य आयुः कर्तारः शान्तिकर्तारः तुष्टिकर्तारः पुष्टिकर्तारः वरदा भवत ॥ इति ग्रहादिबलिः ॥

ऊपर लिखे हुए मंत्रों से दीपक सहित दही और उरिद की बलि नवग्रहों के लिये देवे और उपरोक्त मंत्र से प्रार्थना करे ।

दुर्गायै साङ्गायै सपरिवारायै सायुधायै सशक्तिकायै एतं सदीपं दधिमाषभक्तबलिं समर्प्पयामि भो दुर्गे ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य आयुः कर्त्री क्षेमकर्त्री शान्तिकर्त्री तुष्टिकर्त्री पुष्टिकर्त्री वरदा भव इति दुर्गायै बलिं दद्यात् ॥

इस मंत्र से दुर्गादेवी के लिये बलि प्रदान करे और पूर्ववत् प्रार्थना भी करे ।

अथ क्षेत्रपालबलिः ॥ दधिमाषसिन्दूरकज्जलदीपद्रव्यसहितं भक्तं (मृण्मये) पात्रे निधाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षेत्रपालाय शाकिनीडाकिनीभूतप्रेतवेतालपिशाचसहिताय इमं बलिं समर्प्पयामि । भो क्षेत्रपाल ! दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो भव ॥

इस मंत्र से दही, उर्द, सिन्दूर, कज्जल, दीप और द्रव्य के साथ बलि को एक मृत्पात्र में रखकर भूत, प्रेत, पिशाच, डाकिनी, शाकिनी आदि सहित क्षेत्रपाल के बलि प्रदान करे।

ततः ॐ भूताय त्वा नारातेय स्वरभिविख्येवं ᳪ हतां दुर्य्याः पृथिव्यामूर्वन्तरिक्षमन्वेमि पृथिव्यास्त्वानाभौसादयाम्यदित्या ऽउपस्थेऽग्ने हव्य ᳪ रक्ष ॥ अनेन क्षेत्रपतिबलिनेतारं प्रति तण्डुलान्प्रक्षिपेत् । तदन्ते स्विष्टकृद्धोमः ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते० । इति स्विष्टकृत् ॥

इस मंत्र से क्षेत्रपालकी बलि ले जानेवाले व्यक्ति पर चावल फेंके, तत्पश्चात् उपरोक्त मंत्र से स्विष्टकृत् होम करे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ ब्रह्मणे पूर्णपात्रदानम् ।।

अद्येत्यादि कृतस्यास्य सांगतासिद्ध्यर्थमिदं पूर्णपात्रं प्रजापतिदैवतं ब्रह्मणे दातुमहमुत्सृजे ततो ब्रह्मग्रन्थिकविमोकः ।।

इस ऊपर लिखे हुए वाक्य को पढ़कर ब्रह्मा के लिये कुछ दक्षिणा देवे। और उस ब्रह्मग्रन्थि को जो ब्रह्मा के वरण के समय रखी गयी थी, खोल देवे।

ॐ सुमित्रिया न ऽआपऽओषधयः सन्तु इति पवित्रकं गृहीत्वा प्रणीताजलेन शिरः संमृज्य ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति ऐशान्यां प्रणीता न्युब्जी कुर्यात्। ततो गोदानम् ।।

इस मंत्र से प्रणीता के जल से यजमान का मार्जनकरके—"ॐदुर्मित्रियाः" इस मंत्र से प्रणीता के जल को ईशान कोण में गिरावे और प्रणीताको वहीं उलटकर रख देवे। इसके बाद गोदान करे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ पूर्णाहुति-संकल्पः ॥

अद्येत्याद्यमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे मम मनोऽभिलषितधर्मार्थकामादियथेप्सितायुरारोग्यैश्वर्यं पुत्र पशुसखिसुहृत्सम्बन्धिबन्ध्वादिप्राप्तये ब्राह्मणद्वारा मत्कारिते अमुकयज्ञकर्मणि गणपतिगौर्यादि नवग्रहाद्यधिदेवप्रत्यधिदेव पंचलोकपालदशदिक्पालाद्यावाहितेष्टदेवताप्रीतये च स्वैर्मन्त्रैर्यवतिलतण्डुलाज्याहुतिभिः परिपूर्णतासिद्ध्यये पूर्णाहुतिहोममहं करिष्ये ।

इस वाक्य को पढ़कर यजमान पूर्णाहुति का संकल्प करे।

तत्र यजमानः सपत्नीकः आचार्यस्य दक्षिणस्कन्धं स्पृशन् ताम्बूलपूगीफलाक्षतं घृतं वा घृतपूर्णनारिकेलं वा स्रुवे कृत्वा पूर्णाहुतिं दद्यात् । तन्मंत्रो यथा—ॐ पूर्णादर्विपरापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽइषमूर्जं ᳪ शतक्रतो स्वाहा । इति पूर्णाहुतिः ॥

स्त्री के सहित यजमान, आचार्य का दाहिना कन्धा छूते हुए, ताम्बूल पुंगीफल युक्त नारियल को घृतमें डुबोकर स्रुवा में रक्खे, और ॐ पूर्णादर्विपरापत" इस मंत्र द्वारा पूर्णाहुति देवे ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ बर्हिर्होमः ।

ॐ देवागातुं बिदोगातु वित्वागातुमित मनसस्पत इमं देवयज्ञ ँ स्वाहा व्वातेधाः स्वाहा । इति बर्हिर्होमः ॥

ऊपर लिखे मंत्र को पढ़कर कुशा का हवन करे ।

अथ भस्मवन्दनं त्र्यायुषकरणञ्च ।

ॐ त्र्यायुषं जमदग्नेरिति ललाटे । कश्यपस्य त्र्यायुषमिति ग्रीवायाम् । यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले । तन्नोऽअस्तु त्र्यायुषमिति हृदि ॥ इति त्र्यायुषकरणम् ॥

स्रुवा में भस्म लेकर अनामिका और अंगुष्ठ से ललाट आदि प्रदेशों में नीचे लिखे मंत्रों को पढ़ता हुआ त्र्यायुष्य करे ।

ततो नीराजनम् ॥ साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिमिरापहम् ॥

ऊपर लिखे मंत्र से घृतकी बत्ती या कर्पूर से नीराजन (आरती) करे ।

ततः पुष्पाञ्जलिं गृहीत्वा ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् । तेहनाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाय नमः ॥ ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समतन्तपर्यायी स्यात्सार्वभौमः सर्वायुष आन्तादापरार्धात् । पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ॥ तस्मिन्-श्चाविक्षिते यज्ञे विश्वेदेवाः सभासद इति । ॐ विश्वतश्चक्षुरुत विश्वतोमुखोविश्वतोबाहुरुत विश्वतस्पात् । संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः ॥ श्रीभवानीशंकरमहाविष्णवादिपंचायतनदेवताभ्यो नमः मन्त्रपुष्पांजलिं समर्पयामि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हाथ में फल, अक्षत, और पुष्प लेकर लिखे मंत्रों को पढ़ता हुआ, यजमान मण्डलदेवताओं के लिये पुष्पाञ्जलि प्रदान करे ।

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ।

इस मंत्र से तीन बार प्रदक्षिणा करे ।

अथ प्रार्थना ।

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥ आवाहनं न जानामि न जानामि विसर्जनम् । पूजां चैव न जानामि क्षम्यतां परमेश्वर । अन्यथा शरणन्नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन रक्ष त्वं परमेश्वर ॥ इति प्रार्थना ॥

यजमान हाथ में पुष्प लेकर उपरोक्त मंत्रों से प्रार्थना करे ।

अथ दक्षिणासंकल्पः । इदं ब्रह्मणे इदमाचार्याय इदमृग्वेदमूर्तये यजुर्वेदमूर्तये सामवेदमूर्तये अथर्ववेदमूर्तये हिरण्यान्नभूदानं कांस्यपात्रं सोमदैवतं ताम्रपात्रं सूर्यदैवतं हिरण्यमग्निदैवतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

 रजतं पितृदैवतमासनं कमण्डलुं वरुणदैवतं कङ्कणं वरुणदैवतं मुकुटं प्रजापतिदैवतमुपानहौ
यमदैवते तूलिकशय्येन्द्रदैवते गावः षड्ऋत्विग्भ्यस्संप्रददे न मम ॥ यद्दत्तं तेन यज्ञपुरुषः प्रजापतिः प्रीयताम् ॥

ऊपर लिखे मंत्रों को पढ़कर आचार्य, ब्रह्मा, ऋत्विक् होता आदि ब्राह्मणों को यथाशक्ति दक्षिणा देकर यजमान कहे कि मैंने, जो कुछ दिया, इससे यज्ञ पुरुष प्रजापति (ब्रह्मा) तृप्त होवें।

अथाऽभिषेकः ।

अत्र पत्नी वामतः । रुद्रकलशात्पल्लवोदकैः सकलत्रपुत्रमभिषिंचेत् । तन्मंत्रो यथा
ॐ देवस्यत्वा सवितुःप्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचोयन्तुर्यन्त्रियै दधामि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ । ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ता-भ्याम् ॥ सरस्वत्यै वाचोयन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि । ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ अश्विनो भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि । सर-स्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि । ॐ पा-लाशौ भवति तेन ब्रह्मणोऽभिषिञ्चति ब्रह्म वै पालाशो ब्रह्मणे वनमेतदभिषिंचाति यद्देवकल्पांजुह्योति प्राणा पैकल्पाऽअमृतमुपवै । प्राणाःअमृतेनैनमेतदभिषिंचाति सर्व्वेषां वाऽएषवेनानाꣳरसो यत्साम सर्वेषामेवैनमेतद्वेदाना ꣳ रसेनाभिषिञ्चाति । आपोहिष्ठेति त्रिभिः । गणाधिपोऽर्कश्च शशी धरा-सुतो बुधो गुरुर्भार्गवसूर्य्यनन्दनाः । राहुश्च केतुश्च परं नवग्रहाः कुर्वन्तु वः पूर्णमनोरथं सदा ॥ १ ॥ उपेन्द्र इन्द्रो वरुणो हुताशनस्त्रिविक्रमो भानुसखश्चतुर्भुजः । गन्धर्वयक्षोरगसिद्धचारणाः कुर्वन्तु वः पूर्णमनोरथं सदा ॥ २ ॥ नलो दधीचिः सगरः पुरूरवाः शाकुन्तलेयो भरतो धनं-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जयः । रामत्रयं वैन्यबली युधिष्ठिरः कुर्वन्तु वः पूर्णमनोरथं सदा ॥ ३ ॥ मनुर्मरीचिर्भृगुदक्षना-
रदाः पाराशरो व्यासवसिष्ठभार्गवाः । वाल्मीकिकुम्भोद्भवगर्गगौतमाः कुर्वन्तु वः पूर्णमनोरथं
सदा ॥ ४ ॥ रम्भा शची सत्यवती च देवकी गौरी च लक्ष्मीश्च दितिश्च रुक्मिणी । कूर्मो गजेन्द्रः
सचराचरा धराः कुर्वन्तु वः पूर्णमनोरथं सदा ॥ ५ ॥ गंगा च क्षिप्रा यमुना सरस्वती गोदावरी
वेत्रवती च नर्मदा । सा चन्द्रभागा वरुणा त्वसी नदी कुर्वन्तु वः पूर्णमनोरथं सदा ॥ ६ ॥ तुङ्ग-
प्रभासो गुरुचक्रपुष्करं गया विमुक्ता बदरी बटेश्वरः । केदारपम्पासरसश्च नैमिषं कुर्वन्तु वः पूर्ण-
मनोरथं सदा ॥ ७ ॥ शङ्खश्च दूर्वासितपत्रचामरं मणिः प्रदीपो वररत्नकाञ्चनम् । सम्पूर्णकुम्भः
सुहुतो हुताशनः कुर्वन्तु वः पूर्णमनोरथं सदा ॥ ८ ॥ प्रयाणकाले यदि वा सुमङ्गले प्रभातकाले
च नृपाभिषेचने । धर्मार्थकामाय जयाय भाषितं व्यासेन कुर्यात्तु मनोरथं हि तत् ॥ ९ ॥ इति
व्यासविरचितोभिषेकः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिषेक के समय स्त्री को वामभाग में किये हुए सपरिवार यजमान पर रुद्रकलश (शान्तिकलश) के जल को पंचपल्लव से छिड़के। उस समय ब्राह्मण लोग उपरोक्त मंत्रों को पढ़ते हुए मार्जन करें। इन मंत्रों में " यस्य क्षयाय जिन्वथ " इस मंत्र का मार्जन जल भूमि पर त्याग देवे और शेष श्लोकों को पढ़ते हुए यजमान के सिर पर मार्जन जल छिड़के।

अथ तिलकदानमन्त्रः ॥ ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ १ ॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः। शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥ २ ॥

ऊपर लिखे मन्त्र को पढ़कर यजमान को तिलक (चन्दन) करे।

अथ मण्डलस्थदेवानां प्रार्थना विसर्जनञ्च।

अक्षतानादाय-गच्छ त्वं भगवन्नग्ने स्वस्थाने कुण्डमध्यतः । हुतमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे ॥ १ ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ २ ॥ भूमध्ये गच्छ सिद्ध त्वं गोलोके त्वं प्रजापते । वरुण त्वं जले गच्छ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सागरे कलश व्रज ॥ ३ ॥ हेमन्ते गच्छ गणप ब्रह्माण्डे त्वं पितामह । विष्णो त्वं गच्छ वैकुण्ठे कैलासे त्वं महेश्वर ॥ ४ ॥ लक्ष्मी त्वं हि महाविष्णुं स्वभर्तारमनुव्रज । रवे गच्छ कलिङ्गे त्वं चन्द्र त्वं यमुनातटे ॥ ५ ॥ अवन्तीं गच्छ भौम त्वं बुध त्वं मगधे व्रज । सिन्धुदेशे जीव गच्छ कवे भोजकटे व्रज ॥ ६ ॥ शने त्वं गच्छ सौराष्ट्रे राहो राठीनकं व्रज । अवन्तीं गच्छ केतो त्वं स्वं स्वं स्थानं नवग्रहाः ॥ ७ ॥ इन्द्राऽमरावतीं गच्छ तथाग्नेयीं च पावक । व्रज संयमिनीं धर्म नैर्ऋतीं व्रज निर्ऋते ॥ ८ ॥ वरुणाऽम्भोनिधौ गच्छ सर्वत्र व्रज मारुत । गच्छाऽलकां कुबेर त्वमीशैशानीं दिशं व्रज ॥ ९ ॥ माहेन्द्र त्वं व्रजागस्त्य ध्रुव त्वं मेरुपर्वते । तथा भवद्भिर्ऋषयो गन्तव्यमृषिमण्डले ॥ १० ॥ वसवोऽष्टौ तु गङ्गायां रुद्र रुद्रपुरीं व्रज । गन्धर्वाः किन्नराः सर्वे स्वं स्वं स्थानं च गच्छत ॥ ११ ॥ यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ॥ ४९
इष्टकामप्रासिद्ध्यर्थं पुनरागमनाय च ॥ १२ ॥ रूपं देहि जयंदेहि यशो देहि द्विषो जहि । पुत्रान्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ १३ ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥ १४ ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञ क्रियादिषु ॥ न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ १५ ॥

यजमान पुष्पाक्षत हाथ में लेकर सब देवताओं पर छोड़ता जाय और प्रार्थना करके उनका विसर्जन करे ।

ततो ब्राह्मणान् भोजयित्वा कुटुम्बजनैः परिवृतः स्वयं भोजनं कुर्यात् ॥

अन्त में यथाशक्ति ब्राह्मणों को भोजन करा कर, आदर पूर्वक अपने भाई-बन्धु के साथ भोजन करे ।

❀ इति वसिष्ठोक्ता 'अमरेन्द्र' कविना-संशोधिता हवनपद्धतिः समाप्ता ❀

-:❀❀❀❀❀❀:-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ वासिष्ठी-हवन-पद्धतौ-

यज्ञसूची ।

--:❀❀❀❀❀:--

कर्मकाण्डप्रकर्तॄणां ग्रामीणानाम्पुरोधसाम् ।
हितायाऽत्र 'द्विजेन्द्रेण' यज्ञसूची वितन्यते ॥

कृत्वा नित्यक्रियां सम्यग्याजकः प्राङ्मुखो विशेत् । आहूय मण्डपे सर्वान्बन्धुविप्रपुरोधसः ॥ १ ॥
प्रतिज्ञाऽऽदौ प्रकर्तव्या स्वस्तिवाचनकं ततः । पुण्याहवाचनं कार्यमाचार्यादिवृतिं तथा ॥ २ ॥
रक्षाभिधानकञ्चैव कलशस्थापनं ततः । गणेशाम्बिकयोः पूजा ग्रहस्थापनकं तथा ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मादिसुरवृन्दाना सर्वतोभद्रमण्डले । स्थापनं पूजनं कार्यं यजमानैर्यथाविधिः ॥ ४ ॥
षोडशप्रमुखानां च मातृणां पूजनं तथा । चतुःषष्ठ्यर्चनं कार्यं कृत्वेन्द्रध्वजपूजनम् ॥ ५ ॥
समिद्धिधानं कर्तव्यं कृत्वाऽत्र कुशकण्डिकाम् । ततोऽग्न्यावाहनं कृत्वा महाव्याहृतिपूर्वकः ॥ ६ ॥
होमश्च विधिवत्कार्य्यः पंचवारुणिकं ततः । नवग्रहादिदेवानां लोकपानामतः परम् ॥ ७ ॥
कृत्वा दिक्पालहोमोऽत्र प्रधानस्य ततःपरम् । सर्वतोभद्रदेवानां लोकपानामतःपरम् ॥ ८ ॥
यजमानैस्तु यज्ञेषु कर्त्तव्योऽत्र प्रयत्नतः । दिक्पालानां ग्रहाणां च दधिमाषबलिस्ततः ॥ ९ ॥
क्षेत्रपालबलिं कृत्वा स्विष्टकृद्धवनं ततः । पूर्णपात्रप्रदानञ्च कुर्याद्वै ब्रह्मणे तथा ॥ १० ॥
ब्रह्मग्रन्थिविमोकोऽत्र मार्जनञ्च ततः परम् । गोदानपूर्विका कार्या पूर्णाहुतिरनन्तरम् ॥ ११ ॥
बर्हिर्होमस्ततो भस्मत्र्यायुषाणार्तिके ततः । प्रदक्षिणा प्रकर्तव्या कृत्वा पुष्पांजलिं तथा ॥ १२ ॥
ब्राह्मणेभ्यो धनं देयमाचार्येभ्यो विशेषतः । गोहिरण्याऽन्नदानैश्च तोषणीया द्विजा नृपाः ॥ १३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा०
५१

अभिषेकस्ततः कार्य्यो विसर्जनमतः परम् । ब्राह्मणान्भोजयित्वा तु बन्धूंश्चापि भोजयेत् ॥ १४ ॥ पृ०

वासिष्ठ-पद्धत्यनुसारिणी या विनिर्मितेयं शुभ यज्ञसूची ।

सा सौख्यदा मोदकरा च भूयात् पुरोधसां मण्डल-मण्डनीया ॥ १५ ॥

इति श्रीबलियामण्डलान्तर्गत-दूर्वाहर-ग्राम-निवासि श्री पं० ठाकुरप्रसादपाण्डेयात्मज

"काव्यतीर्थ" पं० श्रीसरयूप्रसाद शर्म्मा (द्विजेन्द्र) कृत-भाषाटीकोपेता

तत्कृत 'यज्ञसूची', सम्बर्द्धिता पं० बालमुकुन्द शास्त्रिणा संस्कृता

॥ वासिष्ठीहवन-पद्धतिः समाप्ता ॥

५१

पं० श्रीलाल उपाध्याय द्वारा—श्रीविश्वेश्वर प्रेस, बुलानाला, काशी में मुद्रित ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रेम

* इति *

वासिष्ठी हवन पद्धति

भाषा टीका सहिता:

* समाप्तः *

श्री विश्वेश्वर प्रेस, बुलानाला काशी में मुद्रित ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection